# Shivaproktam Kashimantramahimavarnanam

# શિવપ્રોક્તં કાશીમન્ત્રમહિમાવર્ણનમ્

## Document Information

Text title : Shivaproktam Kashimantramahimavarnanam

File name : shivaproktaMkAshImantramahimAvarNanam.itx

Category : shiva, shivarahasya, mantra, tIrthakShetra

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam | 177-196||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# શિવપ્રોક્તં કાશીમન્ત્રમહિમાવર્ણનમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
શ્રીશિવઃ (ઉવાચ)
કાશીતિવર્ણયુગલં નિઃસૃતં યન્મુખામ્બુજાત્ ।
તસ્ય સંસારનિગલા ગલિતા એવ તત્ક્ષણે ॥ ૧૭૭॥

વિવશેનાપિ કાશીતિ યેનૈવ સમુદીરિતમ્ ।
સ સદ્યઃ સકલાપદ્ભ્યો મુચ્યતે નાત્ર સંશયઃ ॥ ૧૭૮॥

કાશીતિ પરમં મન્ત્રં સર્વમન્ત્રાધિદૈવતમ્ ।
મુક્તિદં મુનયઃ સર્વે જપન્ત્યનુદિનં મુદા ॥ ૧૭૯॥

કાશીત્યમૃતકલ્લોલલોલજિહ્વા મનીષિણઃ ।
પ્રયાન્તિ શિવસાયુજ્યં ઇજ્યાદાનાદિભિર્યમમ્(ર્વિના) ॥ ૧૮૦॥

કાશીતિ વર્ણયુગ્મસ્ય પ્રભાવં વેદ શઙ્કરઃ ।
કાશીતિ વર્ણદ્વન્દ્વ યદ્બહુદુઃખાપહારકમ્ ॥ ૧૮૧॥

તદ્વિધૂય દ્વન્દ્વદુઃખં શુદ્ધમદ્ધા દદાતિ ચ ।
કાશીત્યુચ્ચરિત યેન પરિહાસેન વા યમ ।
તેન સ્વોપાર્જિતાનન્તપાપં નશ્યત્યસંશયમ્ ॥ ૧૮૨॥

પાપકાનનનાશાય કાશીત્યેષ હુતાશનઃ ।
પરમેશેન નિર્દિષ્ટઃ શિષ્ટઃ કષ્ટવિનાશકૃત્ ॥ ૧૮૩॥

જન્મમૃત્યુજરાદુઃખમહારોગૌષધં પરમ્ ।
કાશીતિ પરમો મન્ત્રો સન્ત્રાસયતિ પાતકમ્ ॥ ૧૮૪॥

સંસારપાપમત્તેભપઞ્ચાનનમનામયમ્ ।
સંસારગર્તમગ્નાનાં કાશીત્યેષ મહામનુઃ ॥ ૧૮૫॥

સમાકર્ષકરં સ્પષ્ટં સર્વશ્રેયસ્કરં તથા ।

સંસારસર્પદષ્ટેન કાશીતિ મનુમૂલિકા ॥ ૧૮૬॥

સંસારવિષશાન્ત્યર્થં સેવનીયા મુહુર્મુહુઃ ।
મુક્તિકાન્તાકર્ષકોઽયં કાશીતિ મનુરુત્તમઃ ॥ ૧૮૭॥

અસકૃદ્વા સકૃદ્વાપિ કાશીતિ મનુમુત્તમમ્ ।
યો જપેત્સ મહાઘેભ્યઃ સદ્ય એવ વિમુચ્યતે ॥ ૧૮૮॥

યમ કાશીતિ વાગ્વલ્લી સુવર્ણદ્વન્દ્વપલ્લવા ।
સ્વર્ગાપવર્ગફલદા બલપ્રમથનપ્રિયા ॥ ૧૮૯॥

કાશી નામ સુધા ધન્યા વસુધાતલવાસિનામ્ ।
પિબન્તિ શ્રદ્ધયા સિદ્ધાઃ શમનૈતાં તપોધનાઃ ॥ ૧૯૦॥

કાશીતિ મન્ત્રરાજોઽયં પુણ્યરાશિસમૃદ્ધિદઃ ।
અનન્તાભેદ્યવિવિધપાપરાશિમહાશનિઃ ॥ ૧૯૧॥

કાશીત્વમૃતમુસ્કૃષ્ટં સુરાણામતિદુર્લભમ્ ।
પિબન્તિ સાધવો ભક્ત્યા ભાલલોચનપૂજકાઃ ॥ ૧૯૨॥

પીત્વાપ્યમૃતમાશાસ્ય સુરા ભૂત્વા પુનર્નરાઃ ।
ભવન્તિ ન તથા કાશીનામામૃતનિપાયિનઃ ॥ ૧૯૩॥

કાશીત્યેષ મહામન્ત્રઃ શ્રેષ્ઠોઽયમમૃતાદપિ ।
અમૃતં નશ્વરં યસ્માદનશ્વરમય મનુઃ ।
(અમૃતં નશ્વરં યસ્માન્મનુરેષ હ્યનશ્વરઃ ।)
એતાદૃશોઽયં કાશીતિ મહામન્ત્રોઽમૃતાત્મકઃ ॥ ૧૯૪॥

કાશીતિ નામોચ્ચરણં સર્વાઙ્ગે ભૂતિધારણમ્ ।
કસ્ય વા મરણેઽભ્યર્ણે ન નિર્વાણં પ્રયચ્છતિ ॥ ૧૯૫॥

કાશીપ્રયાણં કાશીતિ નામ પીયૂષભક્ષણ(સેવન)મ્ ।
વિભૂતિધારણં ચેતિ ત્રયં નિર્વાણદં ન કિમ્ (દાયકમ્) ॥ ૧૯૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપ્રોક્તં કાશીમન્ત્રમહિમાવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૯ શિવગૌરીસંવાદે કાશીપ્રભાવકથનમ્ । ૧૭૭-૧૯૬॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam . 177-196..

Notes:

Śiva શિવ describes about the merits of Varṇayugma વર્ણયુગ્મ that forms the MantraRāja/MahāMantra “Kāśī” મન્ત્રરાજ/મહામન્ત્ર “કાશી”.

Proofread by Ruma Dewan

---

*Shivaproktam Kashimantramahimavarnanam*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*